# Chinmayalinga Ashtakam

# ચિન્મયલિઙ્ગાષ્ટકમ્

## Document Information

Text title : Chinmayalinga Ashtakam

File name : chinmayalingAShTakam.itx

Category : shiva, aShTaka

Location : doc_shiva

Proofread by : Aruna Narayanan

Description/comments : From Atmanatha Stuti Manjari, Ed. S. V. Radhakrishna Sastri

Latest update : December 12, 2022

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2022

*sanskritdocuments.org*

# Chinmayalinga Ashtakam

# ચિન્મયલિઙ્ગાષ્ટકમ્

(શ્રીરુદ્રકૃતમ્)

બ્રહ્મમુખામરપૂજિતલિઙ્ગં જિહ્મગભૂષણભૂષિતલિઙ્ગમ્ ।
સિંહમહામદમર્દનલિઙ્ગં ચિત્ત સદા ભજ ચિન્મયલિઙ્ગમ્ ॥ ૧॥

કનકધરાધરકાર્મુકલિઙ્ગં સનકમુખાદિસુસન્નુતલિઙ્ગમ્ ।
દિનકરકોટિસુદીધિતિલિઙ્ગં ચિત્ત સદા ભજ ચિન્મયલિઙ્ગમ્ ॥ ૨॥

અષ્ટવિભૂતિદમિષ્ટદલિઙ્ગં સૃષ્ટજગત્ત્રયરક્ષકલિઙ્ગમ્ ।
અષ્ટમહાભયશિક્ષકલિઙ્ગં ચિત્ત સદા ભજ ચિન્મયલિઙ્ગમ્ ॥ ૩॥

મત્તગજાજિનવેષ્ટિતલિઙ્ગં દગ્ધજગત્કૃતપઞ્ચકલિઙ્ગમ્ ।
ઉત્તમપૂરુષવત્સલલિઙ્ગં ચિત્ત સદા ભજ ચિન્મયલિઙ્ગમ્ ॥ ૪॥

અઙ્ગભવાઙ્ગસુભઙ્ગદલિઙ્ગં તુઙ્ગજટાભરશોભિતલિઙ્ગમ્ ।
મઙ્ગલદાયકમદ્ભુતલિઙ્ગં ચિત્ત સદા ભજ ચિન્મયલિઙ્ગમ્ ॥ ૫॥

પઙ્કજનેત્રસમર્ચિતલિઙ્ગં શઙ્કરમાદિમમચ્યુતલિઙ્ગમ્ ।
સઙ્કટદોષનિવર્તકલિઙ્ગં ચિત્ત સદા ભજ ચિન્મયલિઙ્ગમ્ ॥ ૬॥

અભ્રસભાન્તરનર્તનલિઙ્ગં શુભ્રવિભૂતિવિભૂષિતલિઙ્ગમ્ ।
શુભ્રહૃદમ્બુજશોભિતલિઙ્ગં ચિત્ત સદા ભજ ચિન્મયલિઙ્ગમ્ ॥ ૭॥

કુન્દવનાન્તરમન્દિરલિઙ્ગં મન્દહસાનનસુન્દરલિઙ્ગમ્ ।
વન્દિતભક્તજનાવૃતલિઙ્ગં ચિત્ત સદા ભજ ચિન્મયલિઙ્ગમ્ ॥ ૮॥

રુદ્રકૃતાષ્ટકમદ્ભુતમેતદ્ભદ્રકરં પઠતીહ મનુષ્યઃ ।
ઇષ્ટફલં સમવાપ્ય યથેષ્ટં શિષ્ટજનોત્તમ એવ હિ સ સ્યાત્ ॥ ૯॥

ઇતિ શ્રીરુદ્રકૃતં ચિન્મયલિઙ્ગાષ્ટકં સમ્પૂર્ણમ્ ।

Proofread by Aruna Narayanan

*Chinmayalinga Ashtakam*

pdf was typeset on December 22, 2022

Please send corrections to *sanskrit@cheerful.com*